(ख) ''काप्यभिख्या तयोरासीत्''– अत्र तयोः पदेन कौ बोद्धव्यौ ? तयोः शोभा कीदृशी आसीत् ?

(ग) ''जगतः पितरौ वन्दे''– जगतः पितरौ कौ ? काभ्यां सह तौ तुलितौ ?

## विभागः-ख

5. संस्कृतभाषया देवनागरीलिप्या च एकस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) ''तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः''– कस्य कस्या वा उक्तिरियम् ? 'निरस्तनारीसमयाः'– इत्यस्य कोऽर्थः ? किरातार्जुनीयम् इति महाकाव्यस्य प्रथमसर्गानुसारं वक्तुः चारित्रिकं वैशिष्ट्यं राजनीतिज्ञानं च आलोचयत।

(ख) ''नारिकेलफलसम्मितं वचो भारवेः''– इति वचनस्य याथार्थ्यं सोदाहरणं प्रतिपादयत।

6. (क) संस्कृतभाषया देवनागरीलिप्या च एकस्य व्याख्या कार्या – 6×1 = 6

(i) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किंप्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः॥

(ii) कथाप्रसङ्गेन जनैरुदाहृता–
दनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानात् व्यथते नताननः
सुदुःसहान्मन्त्रपदादिवोरगः॥

7. देवनागरीलिप्या श्लोकपादपूरणं कुरुत (एकस्य) – 6×1 = 6

(क) व्रजन्ति ते मूढधिपः पराभवं
—————————— ।
——————————
—————————— ॥

(ख) ——————————
—————————— ।
——————————
हितं मनोहारि च दुर्लभं वचः॥

8. द्वयोः संक्षिप्तोत्तरं प्रदेयम् – 3×2 = 6

(क) 'कृतारिषड्वर्गजयेन मानवीम्'– उक्तेरस्याः कः वक्ता ? कस्य विषये वक्तुः इयमुक्तिः ? कस्तावद् अरिषड्वर्गः ?

(ख) कः केन किमर्थं चररूपेण नियुक्तः ?

(ग) 'किरातार्जुनीयम्' इति महाकाव्यस्य नायकः कः ? कश्च किरातः ? कं विषयम् अवलम्ब्य महाकाव्यमिदं रचितम् ?

——×——